# Shrirama-Krishna Viloma Kavyam (kavi sUrya)

# શ્રીરામકૃષ્ણ વિલોમ કાવ્યં (કવિ સૂર્ય)

## Document Information


Text title : rAmakRiShNa viloma kAvyaM (kavi sUrya)

File name : raamakrshhna.itx

Category : kAvya, misc, sAhitya, raama, krishna

Location : doc_z_misc_general

Transliterated by : P. P. Narayanaswami swami at math.mun.ca

Proofread by : P. P. Narayanaswami swami at math.mun.ca

Latest update : April 14, 2012

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.



November 11, 2023

*sanskritdocuments.org*

# શ્રીરામકૃષ્ણ વિલોમ કાવ્યં (કવિ સૂર્ય)

તં ભૂસુતામુક્તિમુદારહાસં
 વન્દે યતો ભવ્યભવં દયાશ્રીઃ ।
શ્રીયાદવં ભવ્યભતોયદેવં
 સંહારદામુક્તિમુતાસુભૂતમ્ ॥ ૧॥

ચિરં વિરંચિર્ન ચિરં વિરંચિઃ
 સાકારતા સત્યસતારકા સા ।
સાકારતા સત્યસતારકા સા
 ચિરં વિરંચિર્ન ચિરં વિરંચિઃ ॥ ૨॥

તામસીત્યસતિ સત્યસીમતા
 માયયાક્ષમસમક્ષયાયમા ।
માયયાક્ષસમક્ષયાયમા
 તામસીત્યસતિ સત્યસીમતા ॥ ૩॥

કા તાપઘ્ની તારકાદ્યા વિપાપા
 ત્રેધા વિદ્યા નોષ્ણકૃત્યં નિવાસે ।
સેવા નિત્યં કૃષ્ણનોદ્યા વિધાત્રે
 પાપાવિદ્યાકારતાઘ્ની પતાકા ॥ ૪॥

શ્રીરામતો મધ્યમતોદિ યેન
ધીરોઽનિશં વશ્યવતીવરાદ્વા
દ્વારાવતીવશ્યવશં નિરોધી
 નયેદિતો મધ્યમતોઽમરા શ્રીઃ ॥ ૫॥

કૌશિકે ત્રિતપસિ ક્ષરવ્રતી
 યોઽદદાદ્ઽદ્વિતનયસ્વમાતુરમ્ ।
રન્તુમાસ્વયન તદ્વિદાદયોઽ
 તીવ્રરક્ષસિ પતત્રિકેશિકૌ ॥ ૬॥

લમ્બાધરોરુ ત્રયલમ્બનાસે
   ત્વં યાહિ યાહિ ક્ષરમાગતાજ્ઞા ।
જ્ઞાતાગમા રક્ષ હિ યાહિ યા ત્વં
   સેના બલં યત્ર રુરોધ બાલમ્ ॥ ૭॥

લઙ્કાયના નિત્યગમા ધવાશા
   સાકં તયાનુન્નયમાનુકારા ।
રાકાનુમા યન્નનુ યાતકંસા
   શાવાધમાગત્ય નિનાય કાલમ્ ॥ ૮॥

ગાધિજાધ્વરવૈરા યે
   તેઽતીતા રક્ષસા મતાઃ ।
તામસાક્ષરતાતીતે
   યે રાવૈરધ્વજાધિગાઃ ॥ ૯॥

તાવદેવ દયા દેવે
   યાગે યાવદવાસના ।
નાસવાદવયા ગેયા
   વેદે યાદવદેવતા ॥ ૧૦॥

સભાસ્વયે ભગ્નમનેન ચાપં
   કીનાશતાનદ્ધરુષા શિલાશૈઃ ।
શૈલાશિષારુદ્ધનતાશનાકી
   પઞ્ચાનને મગ્નભયે સ્વભાસઃ ॥ ૧૧॥

ન વેદ યામક્ષરભામસીતાં
   કા તારકા વિષ્ણુજિતેઽવિવાદે ।
દેવાવિતે જિષ્ણુવિકારતા કા
   તાં સીમભારક્ષમયાદવેન ॥ ૧૨॥

તીવ્રગોરન્વયત્રાર્યો
   વૈદેહીમનસો મતઃ ।
તમસો ન મહીદેવૈ-
   ર્યાત્રાયન્વરગોવ્રતી ॥ ૧૩॥

વેદ યા પદ્મસદનં

સાધારાવતતાર મા ।
મારતા તવ રાધા સા
નન્દ સદ્મપ યાદવે ॥ ૧૪॥

શૈવતો હનનેઽરોધી
યો દેવેષુ નૃપોત્સવઃ ।
વત્સપો નૃષુ વેદે યો
ધીરોઽનેન હતોઽવશૈઃ ॥ ૧૫॥

નાગોપગોઽસિ ક્ષર મે પિનાકેઽ
નાયોઽજને ધર્મધનેન દાનમ્ ।
નન્દાનને ધર્મધને જયો ના
કેનાપિ મે રક્ષસિ ગોપગો નઃ ॥ ૧૬॥

તતાન દામ પ્રમદા પદાય
નેમે રુચામસ્વનસુન્દરાક્ષી ।
ક્ષીરાદસું ન સ્વમચારુ મેને
યદાપ દામ પ્રમદા નતાતઃ ॥ ૧૭॥

તામિતો મત્તસૂત્રામા
શાપાદેષ વિગાનતામ્ ।
તાં નગાવિષદેઽપાશા
માત્રાસૂત્તમતો મિતા ॥ ૧૮॥

નાસાવદ્યાપત્રપાજ્ઞાવિનોદી
ધીરોઽનુત્યા સસ્મિતોઽદ્યાવિગીત્યા ।
ત્યાગી વિદ્યાતોઽસ્મિ સત્ત્યાનુરોધી
દીનોઽવિજ્ઞા પાત્રપદ્યાવસાના ॥ ૧૯॥

સંભાવિતં ભિક્ષુરગાદગારં
યાતાધિરાપ સ્વનઘાજવંશઃ ।
શવં જઘાન સ્વપરાધિતાયા
રઙ્ગાદગારક્ષુભિતં વિભાસમ્ ॥ ૨૦॥

તયાતિતારસ્વનયાગતં મા
લોકાપવાદદ્વિતયં પિનાકે ।
કેનાપિ યં તદ્વિદવાપ કાલો

  માતંગયાનસ્વરતાતિયાતઃ ॥ ૨૧॥

શવેઽવિદા ચિત્રકુરઙ્ગમાલા
  પઞ્ચાવટીનર્મ ન રોચતે વા ।
વાતેઽચરો નર્મનટીવ ચાપં
  લામાગરં કુત્રચિદાવિવેશ ॥ ૨૨॥

નેહ વા ક્ષિપસિ પક્ષિકંધરા
  માલિની સ્વમતમત્ત દૂયતે ।
તે યદૂત્તમતમ સ્વનીલમા-
  રાધકં ક્ષિપસિ પક્ષિવાહને ॥ ૨૩॥

વનાન્તયાનસ્વણુવેદનાસુ
  યોષામૃતેઽરણ્યગતાવિરોધી ।
ધીરોઽવિતાગણ્યરતે મૃષા યો
  સુનાદવેણુસ્વનયાતનાં વઃ ॥ ૨૪॥

કિં નુ તોયરસા પમ્પા
  ન સેવા નિયતેન વૈ ।
વૈનતેયનિવાસેન
  પાપં સારયતો નુ કિમ્ ॥ ૨૫॥

સ નતાતપહા તેન
  સ્વં શેનાવિહિતાગસમ્ ।
સંગતાહિવિનાશે સ્વં
  નેતેહાપ તતાન સઃ ॥ ૨૬॥

કપિતાલવિભાગેન
  યોષાદોઽનુનયેન સઃ ।
સ નયે નનુ દોષાયો
  નગે ભાવિલતાપિકઃ ॥ ૨૭॥

તે સભા પ્રકપિવર્ણમાલિકા
  નાલ્પકપ્રસરમભ્રકલ્પિતા ।
તાલ્પિકભ્રમરસપ્રકલ્પના
  કાલિમર્ણવ પિક પ્રભાસતે ॥ ૨૮॥

રાવણેઽક્ષિપતનત્રપાનતે
   નાલ્પકભ્રમણમક્રમાતુરમ્ ।
રન્તુમાક્રમણમભ્રકલ્પના
   તેન પાત્રનતપક્ષિણે વરા ॥ ૨૯॥

દૈવે યોગે સેવાદાનં
   શઙ્કા નાયે લઙ્કાયાને ।
નેયાકાલં યેનાકાશં
   નન્દાવાસે ગેયો વૈદૈઃ ॥ ૩૦॥

શઙ્કાવજ્ઞાનુત્વનુજ્ઞાવકાશં
   યાને નદ્યામુગ્રમુદ્યાનનેયા ।
યાને નદ્યામુગ્રમુદ્યાનનેયા
   શંકાવજ્ઞાનુત્વનુજ્ઞાવકાશમ્ ॥ ૩૧॥

વા દિદેશ દ્વિસીતાયાં
   યં પાથોયનસેતવે ।
વૈતસેન યથોપાયં
   યન્તાસીદ્ઽવિશદે દિવા ॥ ૩૨॥

વાયુજોઽનુમતો નેમે
   સંગ્રામેઽરવિતોઽક્ષિ વઃ ।
વક્ષિતો વિરમે ગ્રાસં
   મેનેઽતોઽમનુજો યુવા ॥ ૩૩॥

ક્ષતાય મા યત્ર રઘોરિતાયુ-
   રઙ્કાનુગાનન્યવયોઽયનાનિ ।
નિનાય યો વન્યનગાનુકારં
   યુતારિઘોરત્રયમાયતાક્ષઃ ॥ ૩૪॥

તારકે રિપુરાપ શ્રી-
   રુચા દાસસુતાન્વિતઃ ।
તન્વિતાસુ સદાચારુ
   શ્રીપુરા પુરિ કે રતા ॥ ૩૫॥

લઙ્કા રઙ્કાંગરાધ્યાસં
   યાને મેયા કારાવ્યાસે ।

સેવ્યા રાકા યામે નેયા
   સંધ્યારાગાકારં કાલમ્ ॥ ૩૬॥

॥ ઇતિ શ્રીદૈવજ્ઞપણ્ડિત સૂર્યકવિ વિરચિતં
વિલોમાક્ષરરામકૃષ્ણકાવ્યં સમાપ્તમ્ ॥

Encoded and proofread by P. P. Narayanaswami at swami at math.mun.ca

---

*Shrirama-Krishna Viloma Kavyam (kavi sUrya)*

pdf was typeset on November 11, 2023

Please send corrections to *sanskrit@cheerful.com*